२९ पत्रं

नं० ७८२-घ

कुमारसंभवः (अपूर्णः)

नं० ७८२-घ

पत्राणि २९

कुमारकाव्यसर्ग १६ प-५८

=बलाहकानां मेघानां छेदेषु खंडेषु विभक्तः विभागीकृतः रागो यस्याः सा=४

=सर्वे चेते शैलाश्च=२

॥श्रीगणेशाय नमः॥ अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः १ यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् २ अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातं एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवांकः ३ यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्ति बलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्ताम् ४ आमेखलं संचरतां घनानां छायामधः सानुगतां निषेव्य उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ५ पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ६ न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ७ यः पूरयन्कीचकरन्ध्रभागान्दरीमुखोत्थेन समीरणेन उद्गास्यतामिच्छति किन्नराणां स्थानप्रदायित्वमिवोपगन्तुं ८ कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ९ वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः १० उद्वेजयत्यङ्गुलिपार्ष्णिभागान्मार्गे शिलीभूतहिमेपि यत्र न दुर्वहश्रोणिपयोधरार्ता भिन्दन्ति मन्दां गतिमश्व

२

=दर्य एव गृहं दरीगृहं दरीगृहोत्संगे मध्ये निषक्ताः संलग्ना भासः कांतयो यासां ताः=१०=२

=शिल्पं विद्यादयः=२

=सलिलगमनेन नश्यंतीति=२

=शिलैव शिलाभूतं हिमं यत्र=१

कस्मिन्निव सतीव यथा सति साधौ तद्वत् = २

पुनः कथंभूतं अंधकारं उत्कटे तेजसि दिवाभीतमिव = १

मुखैः ११ दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवांधकारं क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः

महतां = २

शिरसां सतीव १२ लांगूलविक्षेपविसर्पिशोभैरितस्ततश्चंद्रमरीचिगौरैः यस्यार्थयुक्तं गिरिराजशब्दं कु

र्वंति वालव्यजनैश्चमर्यः १३ यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किंपुरुषांगनानां दरीगृहद्वा

अपटलानि = ४

रविलंविबिंवास्तिरस्करिण्यो जलदा भवंति १४ भागीरथीनिर्झरशीकराणां वोढा मुहुः कंपितदेवदारुः

यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखंडिबर्हः १५ सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वा

न्परिवर्त्तमानः पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः १६ यज्ञांगयोनित्वमवेक्ष्य यस्य

सारं धरित्रीधरणक्षमं च प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् १७ स मानसीं मेरुसखः पि

तृणां कन्यां कुलस्य स्थितये स्थितिज्ञः मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे १८ काले

= कस्मै कुलस्य स्थितये गोत्रस्य प्रवृद्धये = १ कुलशीलवयोभिरात्मनोऽनुरूपां आत्मसदृशीमित्यर्थः = १

=कृसतिमेनाहिमालयोः सुरतप्रसंगे सतिसंभोग संगमे वर्तमाने ति कथंभूते० स्वरूपयोग्ये याम स्वरूपतुल्ये भूधरराजपत्न्याः किंकुर्वत्याः=१

क्रमेण थैतयोः प्रवृत्ते स्वरूपयोग्ये सुरतप्रसङ्गे मनोरमं यौवनमुद्वहन्त्यां गर्भोऽभवद्भूधरराजपत्न्याः १

९ असूत सा नागवधूपभोग्यं मैनाकमम्भोनिधिबद्धसख्यं क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्राववेदनाज्ञं कु

२

लिशक्षतानां २० अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी सती सती योगविसृष्टदेहा तां

जन्मने शैलवधूं प्रपेदे २१ सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या सम्यक्प्रयोगाद

योऽन्यापदार्थं नियविरोधः समाधिरुच्यते=४

परिक्षतायां नीताविवोत्साहगुणेन संपत् २२ प्रसन्नदिक्पांशुविविक्तवातं शंखस्वनानन्तरपुष्प

वृष्टि शरीरिणां स्थावरजंगमानां सुखाय तज्जन्मदिनं बभूव २३ तया दुहित्रा सुतरां सवित्री स्फु

रत्प्रभामण्डलया चकासे विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव २४ दिने दिने सा परि

वर्द्धमाना लब्धोदया चान्द्रमसीव लेखा पुपोष लावण्यमयान्विशेषान्ज्योत्स्नान्तराणीव कलान्तराणि २

लावण्यमयान्को निवकलान्तराणी व यथा चान्द्रमसी लेखा ... कलायाः अन्याः कलाः कलान्तराणि=१

लावण्यं प्रचुरमयः येषु ते लावण्यमयास्तान् ला० कथंभूता सा लब्धोदया=१

सहिमाचलः कः वदीपइव यथा दीपः प्रभामहत्या शिखया कालया कत्वा स्तत्र विभूषितश्च भवति = ३

उइतिप्रणय
कोपमाविना
एतैतपसेत पोर्थनिष्क्रामतीउमाख्यां जगाम = १

२४ तां पार्वतीत्याभिजनेन नाम्ना बंधुप्रियां बंधुजनो जुहाव उमेति मात्रा तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगाम २५ महीभृतः पुत्रवतोपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिं अनंतपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसंगा २६ प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च २८ मंदाकिनीसैकतवेदिकाभिः सा कंदुकैः कृत्रिमपुत्रकैश्च रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये २९ तां हंसमालाः शरदीव गंगां महौषधीं नक्तमिवात्मभासः स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ३० असंभृतं मंडनमंगयष्टेरनासवाख्यं करणं मदस्य कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे ३१ उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविंदं बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन

प्राप्नुवंति जं० का इव हंसमालाः इव यथा हंसमालाः स्रोतस्यः शरदि शरत्काले गंगां प्राप्नुवंति तद्वत् पुनः कीदृश्यात्मभासः इव यथा आत्मभासः आत्मकांतयः नक्तं रात्रौ महौषधीः प्राप्नुवंति = ४

पुनः किमिव यथा अरविंदमिव यथा अरविंदं सूर्यांशुभिः विकसितं शोभते चतुरस्रशोभितं तद्वत् = १

३२ अभ्युन्नतांगुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरन्तौ आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थां ३३ सा राजहंसैरिव सन्नतांगी गतेषु लीलांचितविभ्रमेषु व्यनीयत प्रत्युपदेशलुब्धैरादित्सुभिर्नूपुरसिंजितानि ३४ वृत्तानुपूर्वे च न चातिदीर्घे जंघे शुभे सृष्टवतस्तदीये शेषांगनिर्माणविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः ३५ नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः ३६ एतावता नन्वनुमेयशोभि काञ्चीगुणस्थानमनिन्दितायाः आरोपितं यद्गिरिशेन पश्चादनन्यनारीकमनीयमंकं ३७ तस्याः प्रविष्टा नतनाभिरंध्रं रराज तन्वी नवरोमराजिः नीवीमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः ३८ निर्भर्त्सितासौ कदलप्रसूति पाणिद्वयं चारु नखं तदीयं नवोदितेन्दुप्रतिमस्पर्शोभां…

न्तः प्रदोषे विफलीचकार ३९ मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला आरोहणार्थं

नवयौवनेन कामस्य सोपानमिव प्रयुक्तं ४० अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृ-

द्धं मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यं ४१ शिरीषपुष्पाधिकसौकुमार्यौ बाहू त-

दीयाविति मे वितर्कः पराजितेनापि कृतौ हरस्य यौ कण्ठपाशौ मकरध्वजेन ४२ कण्ठस्य तस्याः स्तन-

वन्धुरस्य मुक्ताकलापस्य च निस्तलस्य अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः ४३

कथंभूतस्य कण्ठस्य च पुनः मुक्ताकलापस्य स्तनवन्धुरस्य शोभाकारात् ... मनोज्ञस्य ... वन्धुरमनोज्ञस्य=४

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्यां उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां

प्रीतिमवाप लक्ष्मीः ४४ पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थं ततोऽनुकुर्या-

द्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ४५ स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभि-

=कोमलवाक्कोकिलवयस्याः=२

अन्यपुष्टा काइव वितंत्री रिव यथा वितंत्री: स्वरहीना वीणा तामाना वीणा श्रोतु श्रावक स्यप्रति कूलशब्दा भवति = ३

जातबाचि अप्यन्यपुष्टाप्रतिकूलशब्दा श्रोतुर्वितंत्रीरिव ताड्यमाना ४६ प्रवातनीलोत्पलनिर्विशे

षमधीरविप्रेक्षितमायताक्ष्या तयागृहीतंनु मृगांगनाभ्यस्ततोगृहीतंतुमृगांगनाभिः ४६ तस्याः

शलाकांजननिर्मितेव कांतिर्भ्रुवोरायतलेखयोर्या तांवीक्ष्यलीलाचतुरामनंगः स्वचापसौंद

र्यमदंमुमोच ४८ लज्जातिरश्चांयदिचेतसिस्यादसंशयंपर्वतराजपुत्र्याः तंकेशपाशंप्रसमीक्ष्य

कुर्युर्वालप्रियत्वंशिथिलंचमर्यः ४९ सर्वोपमाद्रव्यसमुच्चयेनयथाप्रदेशंविनिवेशितेन सानिर्मि

तांविश्वसृजाप्रयत्नादेकस्थसौंदर्यदिदृक्षयेव ५० तांनारदःकामचरःकदाचित्कन्यांकिलप्रेक्ष्य

पितुःसमीपेसमादिदेशैकवधूंभवित्रींप्रेम्णाशरीरार्द्धहरांहरस्य ५१ गुरुःप्रगल्भेपिवयस्यतोस्यास्त

स्थौनिवृत्तान्यवराभिलाषः ऋतेकृशानोर्नहिमंत्रपूतमर्हंतितेजांस्यपराणिहव्यं ५२ अयाचितारं

गुरुः पिता हिमाचलः अतः अस्याः ... नारदवचनात् = २

४

नहि देवदेवमद्रिः सुतां ग्राहयितुं शशाक अभ्यर्थनाभंगभयेन साधुर्माध्यस्थ्यमिष्टेप्यवलंबतेर्थे ५३

यादेव पूर्वे जनने शरीरं सा दक्षरोषात्सुदती ससर्ज तदाप्रभृत्येव विमुक्तसंगः पतिः पशूनामपरिग्रहो

भूत् ५४ स कृत्तिवासास्तपसे जितात्मा गंगाप्रवाहोक्षितदेवदारु प्रस्थं हिमाद्रेर्मृगनाभिगंधि किं

चित्क्वणत्किन्नरमध्युवास ५५ गणा नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शवतीर्वसानाः मनःशिला

विच्छुरिता निषेदुः शैलेयनद्धेषु शिलातलेषु ५६ तुषारसंघातशिलाः खुराग्रैः समुल्लिखन्दर्पक

लः ककुद्मान् दृष्टः कथंचद्गवयैर्विविग्नैरसोढसिंहध्वनिरुन्ननाद ५७ तत्राग्निमाधाय समित्स

मिद्धं स्वमेव मूर्त्यंतरमष्टमूर्त्तिः स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चकार ५८ अन

र्घ्यमर्घ्येण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा आराधनायास्य सखीसमेतां समादिदेशप्रय

गजेन्द्रचर्मधारी=३

पुनः कथंभूतः ककुद्मान् सोढुमशक्यं सिंहध्वनिर्येन सः असोढसिंहध्वनिः=३

कथंभूतं महेश्वरं न विद्यते अर्घ्यो यस्य तं अनर्घ्यं=२

आदेशं दत्तवान्=१

तौ तज्जौ ५९ प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोनुमेने बिकारहेतौ सति बिक्रियंते ये

षां न चेतांसि त एव धीराः ६० अविचितबलिपुष्पा वेदिसंमार्गदक्षा नियमविधिजलानां बर्हिषां चो

पनेत्री गिरिशमुपचचार प्रत्यहं सा सुकेशी नियमितपरिखेदा तच्छिरश्चंद्रपादैः ६१ इति श्रीकुमार

सम्भवे महाकाव्ये उमोत्पत्तिवर्णनो नाम प्रथमः सर्गः १॥ तस्मिन्विप्रकृताः काले तारकेण दिवौकसः

तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः १ तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियां सरसां सुप्तपद्मा

नां प्रातर्दीधितिमानिव २ अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखं वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थि

रे ३ नमस्त्रिमूर्त्तये तुभ्यं प्राक्सृष्टेः केवलात्मने गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ४ यदमोघम

पामंतरुप्तं बीजमज त्वया अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ६ नमो रजोजुषे सृष्टौ स्थितौ स

५

स्वयंभवतीति स्वयंभूः ॥ उक्तं चाब्रुस्मातेसृजोतेलोकानविष्णुत्वेपालयस्थिरुद्रत्वेसंहरस्त्वेवतिस्रोवस्थास्त्वय तस्मैस्वयंभुवे भुवि=९

त्वमयायुते तमोमयायां सांगरे त्रिरूपाय ससस्वयंभुवे ७ तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्

प्रलयस्थितिसर्गाणामेकः कारणतां गतः ८ स्त्रीपुंसावात्मभागौ ते भिन्नमूर्त्तेः सिसृक्षया प्रसूतिभाजः

सर्गस्य तावेव पितरौ स्मृतौ ९ स्वकालपरिमाणेन व्यस्तरात्रिंदिवस्य ते स्वप्नावबोधौ भूतानां तावेव प्र

लयोदयौ १० जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ११

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे १२ द्रवः संघात

कठिनः स्थूलः सूक्ष्मो लघुर्गुरुः व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु १३ उद्घातः प्रणवो यासां न्या

यैस्त्रिभिरुदीरणं कर्म यज्ञः फलं स्वर्गः तासां त्वं प्रभवो गिरां १४ त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीं

तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः १५ त्वं पितॄणामपि पिता देवानामपि देवता परतोपि परश्चासि

=हे भगवन् जगद्योनिः जगतां स्वर्गमर्त्यपाताललानां योनिरुत्पत्तिस्थानं ... [illegible]

स्याः ... [illegible] ... हे भगवन् जगदादिरसि त्वं अनादिरसि कस्मात् पुराणपुरुषत्वात्=५

प्रसूतिं संतानं भजतीति प्र सूतिभाक् तस्य प्रसूत्य=२

न विद्यते ईश्वरो यस्य=४

स्वयमेव प्रलयंयातीति=५
घृतजलरसात्मकत्वात्=६

=परमात्मा ... संघातः तेन कठिनः संघा० कस्मात् द्रवपदार्थपाषाणादिरूपत्वात्=३

विधाता वेधसामपि १६ त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परं

१७ इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयंगमाः प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः १८ पुराणस्य कवेस्तस्य

चतुर्मुखसमीरिता प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी १९ स्वागतं स्वानधीकारान्प्रभावैरवलम्ब्य

वः युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः २० किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा हिमक्लिष्टप्रभा

णि ज्योतींषीव मुखानि वः २१ प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधं वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव

लक्ष्यते २२ किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः २३ कुबेर

स्य मनःशल्यं शंसतीव पराभवं अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः २४ यमोऽपि विलिखन्भूमिं दण्डेना

स्तमितत्विषा कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवं २५ अमी च कथमादित्याः प्रतापक्षति

६

आवर्जितेषु परम वनेत्रेषु जटानां मौलिषु जटाजूटे पुविलंबिनः त्रासिनः शशिचन्द्रलेखा येषां ते आ० =२ अग्रेतरसा वलेन पीडाभ्रत्वात् =१

शीतलाः चित्रन्यस्ताइवगताःप्रकामालोकनीयतां २६ पर्याकुलत्वान्मरुतांवेगभङ्गोनुमीयते अम्भसां

मोघसंरोधःप्रतीपगमनादिव २७ आवर्जितजटामौलिविलम्बिशशिकोटयः रुद्राणामपिमूर्द्धानः क्ष

तांहुंकारशंसिनः २८ लब्धप्रतिष्ठाःप्रथमंयूयंकिंबलवत्तरैः अपवादैरिवोत्सर्गाःकृतव्यावृत्तयः

परैः २९ तद्ब्रूतवत्साःकिमितःप्रार्थयध्वेसमागताः मयिसृष्टिर्हिलोकानांरक्षायुष्मास्ववस्थिता ३०

तदनंतरं मंदेनानिलेनोद्धूतकमलाकरः ... शोभते ... शीलमंदानिलोद्धूतकमलाकरशोभितेन मंदा०

ततोमन्दानिलोद्धूतकमलाकरशोभिना गुरुंनेत्रसहस्रेणप्रेरयामाससंवदः ३१ सद्विनेत्रंहरेश्चक्षुः स

सहस्रनयनादधिकं बृहस्पतिः ब्रह्माणं

हस्रनयनाधिकं वाचस्पतिरुवाचेदंप्राञ्जलिर्जलजासनं ३२ एवंयदात्थभगवन्नामृष्टंनःपरैःपदं प्रत्येकं

म्विनियुक्तात्माकथंनज्ञास्यसिप्रभो ३३ त्वयादत्तवरोदीर्णस्तारकाख्योमहासुरः उपप्लवायलोका

नांधूमकेतुरिवोत्थितः ३४ पुरेतावतमेवास्यतनोतिरविरातपं दीर्घिकाकमलोन्मेषोयावन्मात्रेणसाध्यते ३५

यथा धूमकेतुः लोकानां उपप्लवाय पीडनाय उत्थितः इत्यर्थः तारकस्य =१ सूर्यः =१ साकलिकापि कमलविकाशः =१

यथा अपवादैः विशेषैः उत्सर्गाः सामान्यविधयः कृतव्यावृत्तयः तिरस्कृताः =२

कथंभूतः इंद्र हरेः इंद्रस्य चक्षुः =४

एकैकं प्रति वस्तु कोवा पादिते आत्मा येन सः =२

= हेमगवन् =

नवाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकं ॥३५॥ पर्यायसेवामुत्सृज्य पुष्पसंभारतत्पराः

सर्वदा सर्वस्मिन्काले = १

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते नादत्ते केवलां लेखां हरचूडामणीकृतां ३६ व्यावृत्तगतिरुद्याने

वसन्तादयः षड् ऋतवः = २
तारकं = २

कुसुमस्तेयसाध्वसात् उद्यानपालसामान्यमृतवस्तमुपासते ३७ तस्योपायनयोग्यानि रत्नानि सरितां पतिः

कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते ३८ ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि स्थिरप्रदीपता

स्थिराश्च ते दीपाश्च स्थिरप्र° तेषां भावः स्थिरप्रदीपता तां = ३

मेत्य भुजगाः पर्युपासते ४० तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूष

णैः ४१ इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयं शाम्येत्प्रत्युपकारेण नोपकारेण दुर्जनः ४२ तेनामरवधूहस्त

कथंभूताः नंदनद्रुमाः = ३
छेदाश्च पाताश्च छेदपाताः तान् अभिजानन्तीति अभिज्ञाः = ३

सदयोल्लूनपल्लवाः अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः ४३ वीज्यते स हि संसुप्तः श्वाससाधारण

निलैः चामरैः सुरबन्दीनां वाष्पसीकरवर्षिभिः ४४ उत्पाद्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः आक्रीड

पर्वतास्तेन कल्पिताः स्वेषु वेश्मसु ४५ मंदाकिन्याः पयः शेषं दिग्वारणमदाविलं हेमाम्भोरुहसस्यानां

तदप्यो धामसाम्यतः ४६ भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते खिलीभूते विमानानां तदापातभयात्पथि

४७ यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ४८ उ

च्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ४९ तस्मिन्नुपायाः सर्वे नः क्रूरे प्र

कस्मिन्न्... कानीव=४

तिहतक्रियाः वीर्यवन्त्यौषधानीव विकारे सान्निपातिके ५० जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा

यत्र यस्मिन्... =४

हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितः ५१ तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये कर्मबन्धच्छिदं धर्मं भ

एवं तत्स्राभवंतस्त्वणेनिवेदयसे ... धर्मं=३ ... कर्म ... जयश्रियंकामिव=३

वस्येव मुमुक्षवः ५२ गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियं

यस्मिन्सति=२

५२ वचस्युपरते तस्मिन्ससर्ज गिरमात्मभूः गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा ५३ संपत्स्यते वः

मोदेवा युष्माकं=२

कामोऽयं कालः कश्चित्प्रतीक्ष्यतां न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ५४ इतः स दैत्यः प्राप्तश्रीर्नेत एवा

मोदेवाः=२

अत एव मत्तः ... =२

हेतिक्षयं विषवृक्षोपिसंव(र्ध्य)स्वयंछेत्तुमसांप्रतं ५५ वृतंतेनेदमेवप्राङ्मयाचास्मैप्रतिश्रुतं वरे-
णशमितंलोकानलंदग्धुंहितत्तपः ५६ संयुगेसांयुगीनंतमुद्यतंप्रसहेतकः अंशादृतेनिषिक्तस्यनीलरोहितरेत
सः ५७ सहिदेवःपरंज्योतिस्तमःपारेप्रतिष्ठितं परिछिन्नप्रभावर्द्धिर्नमयानचविष्णुना ५८ उमारूपेणतेयूयंसं
यमस्तिमितंमनः शंभोर्यतध्वमाक्रष्टुमयस्कान्तेनलोहवत् ५९ उभेएवक्षमेवोढुमुभयोर्बीजमाहितं सावाशं
भोस्तदीयावामूर्त्तिर्जलमयीमम ६० तस्यात्माशितिकंठस्यसेनापत्यमुपेत्यवः मोक्ष्यतेसुरबंदीनांवेणीर्वीर्यवि
भूतिभिः ६१ इतिव्याहृत्यविबुधान्विश्वयोनिस्तिरोदधे मनस्याहितकर्त्तव्यास्तेपिप्रतिदिवंययुः ६२ तत्रनि
श्चित्यकंदर्पमगमत्पाकशासनः मनसाकार्यसंसिद्धैत्वराद्विगुणरंहसा ६३ अथसललितयोषिद्भ्रूलताचारुशृं
गंरतिवलयपदांकेचापमासज्यकंठे सहचरमधुहस्तन्यस्तचूतांकुरास्त्रः शतमखमुपतस्थेप्रांजलिःपुष्पध
न्वा ६४॥ ॥इतिश्रीकुमारसंभवेमहाकाव्येकालिदासकृतौब्रह्माभिगमनोनामद्वितीयःसर्गः २

वद्धांजलिः=२

॥६॥ तस्मिन्मघोनस्त्रिदशान्विहाय सहस्रमक्ष्णां युगपत्पपात प्रयोजनापेक्षितया प्रभूणां प्रायश्च
लं गौरवमाश्रितेषु ॥१॥ स वासवेनासनसन्निकृष्टमितो निषीदेति विसृष्टभूमिः भर्तुः प्रसादं प्र
तिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनं ॥२॥ आज्ञापय ज्ञातविशेष पुंसां लोकेषु यत्ते करणीयमस्ति
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितुमाज्ञया ते ॥३॥ केनाभ्यसूयाफलकांक्षिणा ते नितान्तदीर्घैर्जनिता तपो
भिः यावद्भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती ॥४॥ असम्मतः कस्तव मुक्तिमार्गं पुनर्भ
वक्लेशभयात्प्रपन्नः बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः ॥५॥ अध्यापितस्यो
शनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटा

कामः एनं इन्द्रं उवाच =२

आहितः आरोपितः सायको बाणो यस्मिन् तत =
कथंभूतः कः जन्ममरणादिखेदभयात् =२

तावत्तेन तव ईर्ष्या भवति यत्तदो नित्यसंबंधः =२ कथंभूतेन केन फलकांक्षिणा फलस्वर्गराज्यकांक्षिणा ... प्रीलः फलकांक्षिणा =२

=हे स्वामिन् तावत्तेन तव ईर्ष्या भवति यत्तदोर्नित्यसंबंधः यावत् अस्य मत्कार्मुकस्य निदेशवर्ती वशवर्ती भवति =२

रकः पतिर्यस्याः सा पुनः रास्याः व्रतं तेन दुःखस्वभावा ता = २

यया प्रसद्धे घः सिंधोऽप
स्तटोऽपीउयति तद्वत् = २

नो घस्त्र व संदेहः ॥ ६ ॥ कामैकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टां नितंबिनीमिच्छसि
मुक्तलज्जां कंठे स्वयंग्राहनिषक्तबाहुं ॥ ७ ॥ कयासि कामिन् सुरतापराद्धः पादानतः कोपनया
वधूतः तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरं ॥ ८ ॥ प्रसीद विश्राम्यतु
वीर वज्रं शरैर्मदीयैः कतमः सुरारिः बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिता
धराभ्यः ॥ ९ ॥ तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा कुर्यां हरस्यापि पिनाक
पाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥ १० ॥ अथोरुदेशादवतीर्य पादमाक्रांतसंभावितपादपी
ठं संकल्पितार्थे विवृतात्मशक्तिमाखंडलः [illegible] मिदमभ्यभाषे ॥ ११ ॥ सर्वं सखे त्वय्युप

संकल्पिते थे विचारिते थे कार्ये विवृता प्रकटीकृता आत्मा शक्तिर्येन स विवृ० तं = १

को

कोपनरो बेण स्फुरितोऽध
रो येषां तास्ताः ताभ्यः = ३

निष्फलीकृतं बाहुवीर्यं ये
न सः = ४

पिनाकं मस्तकं पालीय
स्यसः पिनाकपालिः त
स्य पिनाकपाणिस्तेन
भयोत्पादकत्वं = ३

उच्चैः उन्नताः उत्कटाः द्विषो येषां ते उच्चैर्द्विषस्तेषां दैत्यारीणाम् आ नुमितं ईप्सितं अर्थं हे मदन देव त्वं निबोध बुध्यस्व=२
=ब्रह्मणि ब्रह्मज्ञाने नियोजितः आत्मा येन सः=४

हे काम अतएव मत्र त्वं आत्मतत्त्वं अस्माकारणे तं=१

पन्नमेतद्द्वयमेव मास्त्रं कुलिशं भवांश्च ॥ वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च ॥१२॥ अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये ॥ व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ॥१३॥ आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पं ॥ निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदत्र ॥१४॥ अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः ॥ स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ॥१५॥ तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व ॥ योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टं ॥१६॥ गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायां ॥ अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ॥१७॥ तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव ॥ अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ॥१८॥ अस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वं ॥ अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥१९॥ सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानां ॥ चापेन ते कर्म न चातिहिंस्रं महो बतासि स्पृहणीयवीर्यः ॥२०॥ मधुश्च ते मन्मथ साहचर्यादसावनुक्तोऽपि सहाय एव ॥ समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य ॥२१॥ तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे ॥ दिग्वारणास्फालनकर्कशेन हस्तेन पस्पा

चापेन कर्तुमशक्यं न अन्येषां साधारणं अनन्यसाधारणं=३
स्पृहणीयं श्लाघ्यं वीर्यं यस्य सः=२
गृहीत्वा=१
आज्ञां कामिव शेषामिव माला मिव भयात् कालेन प्रसादार्थं दीयते इति स्थितिः=१
दिशां वारणानां हस्तिनः तेषां आस्फालनेन ताडनेन कर्कशः तेन=१

यज्ञानां अंशं भुञ्जन्तीति यज्ञांशभुजस्तेषां=३
त्वदीयेन एकेन इषुनिपातेन शरक्षेपेण=४
ब्रह्मणः अङ्गभूः=८
सुरवधूवर्गः मत्प्रणिधिः मदीश्वरः=६
बीजस्याङ्कुरः बीजा०=४
कः किमिव उत्पन्ने=४
पानीयमिव=४
उक्तमर्थमर्थान्तरन्याय आनन्द० द्युति=३
अहो इति आश्चर्ये बत=सि सं बोधने=२

मो काम अस्माकं=२
हिते श्रेयेन मो काम=२
सावधानं=६
त्वं व्रज=६
कार्यसिद्ध्यै=६
कुमारजन्मलक्षणः अर्थान्तरः कामः तस्य संबोधने क्रियते हेऽर्थान्तर मो काम=१
अस्प्राक्षीत्=१

शीतं दिगमिंद्रः ॥ २२ ॥ समाधवेनाभिमतेन सख्या रत्या च साशंकमनुप्रयातः । अंगव्ययप्रार्थितकर्मसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ॥ २३ ॥ तस्मिन्वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती । संकल्पयोनेरभिमानभूतं आत्मानमाधाय मधुर्जजृंभे ॥ २४ ॥ कुबेरगुप्तां दिशिमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलंघ्य । दिग्दक्षिणा गंधवहं मुखेन व्यलीकनिश्वासमिवोत्ससर्ज ॥ २५ ॥ असूत सद्यः कुसुमान्यशोकः स्कंधात्प्रभृत्येव सपल्लवानि । पादेन नापैक्षत सुंदरीणां संपर्कमासिंजितनूपुरेण ॥ २६ ॥ सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे । निवेशयामास मधुर्द्विरेफान्नामाक्षराणीव मनोभवस्य ॥ २७ ॥ वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गंधतया स्म चेतः । प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥ २८ ॥ बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि । सद्यो वसंतेन समागतानां नखक्षतानीव वनस्थलीनां ॥ २९ ॥ लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य । रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलंचकार ॥ ३० ॥ मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः । मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः ॥ ३१ ॥ चूतांकुरास्वादकषायकंठः पुंस्कोकिलो यन्मधुरं चुकूज । मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥ ३२ ॥ हिमव्यपायाद्विशदाधरा

णामी पाण्डुरीभूतमुखच्छवीनां । स्वेदोद्गमः किंपुरुषाङ्गनानां । चक्रे पदं पत्रविशेषकेषु ॥३३॥ तपस्विनः स्थाणुवनौक
सस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिं । प्रयत्नसंस्तम्भितविक्रियाणां कथंचिदीशा मनसां बभूवुः ॥३४॥ तं देशमारोपित
पुष्पचापे रतिद्वितीये मदने प्रपन्ने । काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ॥३५॥ मधु द्विरेफः कुसुमैक
पात्रे पपौ प्रियां स्वामनुवर्तमानः । शृङ्गेण संस्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥३६॥ ददौ सरः पङ्कजरेणुग
न्धि गजाय गण्डूषजलं करेणुः । अर्धोपभुक्तेन बिसेन जायां संभावयामास रथाङ्गनामा ॥३७॥ गीतान्तरेषु श्रमवा
रिलेशैः किंचित्समुच्छ्वासितपत्रलेखं । पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुम्ब ॥३८॥ पर्याप्तपुष्पस्तब
कस्तनीभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः । लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥३९॥ श्रुताप्सरोगी
तिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव । आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥४०॥ लतागृह
द्वारि गतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः । मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान्व्यनैषीत् ॥४१॥ निष्कम्पवृक्षं
निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारं । तच्छासनात्काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥४२॥ दृष्टिप्रपातं परि

दृष्टिप्रपातं कमिव=१ = आसन्नो निकटो शरीरपातो देहभ्रंशो यस्य स=२ =पुनः कं=देवदारुवृक्षस्य अंधः स्थल्यां उपविष्टं देव दारुद्रुमस्य वेदिका दा०=१
कर्णावशक्तं कर्णावलंबि द्विगुणं अक्षसूत्रं अक्षमाला यस्य स तं=४

ष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ४३ स देवदारुद्रुमवे
दिकायां शार्दूलचर्मव्यवधानवत्यां आसीनमासन्नशरीरपातस्त्रिलोचनं संयमिनं ददर्श ४४ पर्यङ्कबन्धस्थिरपूर्वकायं
मृज्वायतं सन्नमितोभयांसं उत्तानपाणिद्वयसन्निवेशात्प्रफुल्लराजीवमिवाङ्कमध्ये ४५ भुजङ्गमोन्नद्धजटाकलापं क
र्णावशक्तद्विगुणाक्षसूत्रं कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं स्पर्शवतीं दधानं ४६ किञ्चित्प्रकाशस्तिमितोग्रतारै
र्भ्रूविक्रियायां विरतप्रसङ्गैः नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्षीकृतघ्राणमधोमयूखैः ४७ अवृष्टिसंरम्भमिवाम्बुवाहमपा
मिवाधारमनुत्तरङ्गं अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपं ४८ कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्र
रोहैरुदितैः शिरस्तः मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः ४९ मनोनवद्वारनिषिद्धवृत्ति हृदि व्यवस्था
प्य समाधिवश्यं यमक्षरं वेदविदो विदुस्तमात्मानमात्मन्यवलोकयन्तं ५० कुलकम्॥ स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्न
दूरान्मनसाप्यधृष्यं नालक्षयत्साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ४९ निर्वाणभूयिष्ठमथास्य वीर्यं संधु
क्षयन्तीव वपुर्गुणेन अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ५० अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिक
र्णिकारं मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती ५१ आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरु

=आकृष्टाः नीताः =मुक्ताकलापीकृताः मुक्ताभरणीकृता निसिन्दुवा
हेमुप्रः सुवर्णस्य द्युतिर्निर्गुंडीकुसुमानि यत्र तत्=१
तेः कोमिपन=१

११

ऽणार्करागं सुजातपुष्पस्तवकावनम्रा संचारिणी पल्लविनी लतेव ५२ स्रस्तां नितंवादवलंवमानां पुनः पुनः केसरपुष्प

काञ्चीं न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ५३ सुगन्धिनिश्वासविवृद्धतृष्णं विंवाधरासन्नचरं द्वि

रेफं प्रतिक्षणं संभ्रमलोलदृष्टिर्लीलारविंदेन निवारयंती ५४ कुलकं तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानां

जितेन्द्रिये शूलिनि पुष्पकेतुः स्वकर्मसिद्धिं पुनराशशंस ५५ भविष्यतः पत्युरुमा च शंभोः समाससाद प्रतिहारभू

मिं योगात्स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ५६ ततो भुजंगाधिपतेः फणाग्रैरधः कथंचिद्धृतभू

मिभागं शनैः कृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निविडं विभेद ५७ तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शै

लसुतामुपेतां प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमितप्रवेशां ५८ तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलू

नः शिशिरात्ययस्य व्यकीर्यत त्र्यंवकपादमूले पुष्पोच्चयः पल्लवभंगभिन्नः ५९ उमापि नीलालकमध्यशोभि वि

स्रंसयंती नवकर्णिकारं चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ६० अनन्यभाजं पतिमाप्नुहीति सा
तथ्यमेवाभिहिता भवेन नहीश्वरव्याहृतयः कदाचित्पुष्णंति लोके विपरीतमर्थं ६१ कामस्तु बाणावसरं प्रती
क्ष्य पतंगवद्वह्निमुखं विविक्षुः उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ६२ अथोपनिन्ये गिरिशाय गौ
री तपस्विने ताम्ररुचा करेण विशोषितां भानुमतो मयूखैः मन्दाकिनीपुष्करबीजमालां ६३ प्रतिग्रहीतुं प्रणयिप्रियत्वा
त्त्रिलोचनस्तामुपचक्रमे च सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणं ६४ हरस्तु किंचित्परिलुप्तधैर्यश्चं
द्रोदयारंभ इवांबुराशिः उमामुखे बिंबफलाधरोष्ठे व्यापारयामास विलोचनानि ६५ विवृण्वती शैलसुतापि भाव
मंगैः स्फुरद्बालकदंबकल्पैः साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ६६ अथेंद्रियक्षोभमयुग्मनेत्रः
पुनर्वशित्वाद्बलवन्निगृह्य हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपांतेषु ससर्ज दृष्टिं ६७ स दक्षिणापांगनिविष्टमुष्टिं
नतांसमाकुंचितसव्यपादं ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिं ६८ तपःपरामर्शविवृद्धमन्योर्भ्रूभंगदु
ष्प्रेक्ष्यमुखस्य तस्य स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ६९ क्रोधं प्रभो संहर संहरेति यावद्गि
रः खे मरुतां चरन्ति तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ७० तीव्राभिषंगप्रभवेन वृत्तिं मोहेन संस्तंभ

पं...= कामितस्य तः पतितः पद्मलयस्य सतेन=१

न ज्ञानं पतिव्यसनं भर्तुः दुःखं यस्याः सा=१ गणसहितः भूतैः गणैः सह वर्तते सभूतः=२

यतेंद्रियाणां ॥ अज्ञातभर्तृव्यसना मुहूर्त्तं कृतोपकारेव रतिर्बभूव ॥ ७१ ॥ तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभ

ज्य ॥ स्त्रीसन्निकर्षं परिहर्त्तुकामः अन्तर्दधे भूतपतिः सभूतः ॥ ७२ ॥ शैलात्मजापि पितुरुच्छिरसोभिलाषं ॥ व्यर्थं समर्थ्य

ललितं वपुरात्मनश्च ॥ सख्योः समक्षमिति चाधिकजातलज्जा ॥ शून्या जगाम भवनाभिमुखी कथंचित् ॥ ७३ ॥ सपदि मुकु

लिताक्षीं रुद्रसंरंभभीत्या ॥ दुहितरमनुकंप्यामद्रिरादाय दोर्भ्यां ॥ सुरगज इव बिभ्रत्पद्मिनीं दन्तलग्नां प्रतिपथगति

रासीद्वेगदीर्घीकृतांगः ॥ ७४ ॥ इति श्रीकुमारसंभवे महाकाव्ये कविश्रीकालिदासकृतौ मदनदहनो नाम तृतीयः सर्गः

समाप्तः ॥ ३ ॥ श्री ॥ अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता ॥ विधिना प्रतिपादयिष्यता नववैधव्य

मसह्यवेदनं १ अवधानपरे चकार सा प्रलयांतोन्मिषिते विलोचने ॥ न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्श

नदर्शनं २ अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म

केवलं ३ अथ सा पुनरेव विह्वला वसुधालिंगनधूसरस्तनी विललाप विकीर्णमूर्द्धजा समदुःखामिव कुर्वती ८

कांतिः शोभा विद्यते यस्य सः कांतिमान् तस्य भावः कांतिमत्ता तया = कथं भूतं त्वं क्षणमात्रेण = २ यथा जलसंघातः नलिनीं पद्मिनीं परित्यज्य विद्रुवति तद्वत् = २

१३

स्थली ४ उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ५ क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः ६ कृतवान्न सि विप्रियं न मे प्रतिकूलं न च ते मया कृतं किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ७ स्मरसि स्मर मेखलागुणैरुत गोत्रस्खलितेषु बन्धनं च्युतकेसरदूषितेक्षणान्यवतंसोत्पलताडनानि वा ८ हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवं उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ९ परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् १० रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ११ नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन् पदे पदे असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना १२ अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः बहुलेपि गते निशाकरस्तनुतां दुःखमनङ्ग मोक्ष्यति १३ हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति १४ अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता विरुतैः करुणस्वनैरियं गुरुशोकादनुरोदितीव मां १५ प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदु

मो कामनु हि वितर्के = २

१३

सुव्रतसमयेनामसप्त्रीग्रहणेषु = ४

कस्मिन् नसति = ५

केवलं रुणानि नयनानि घूर्णयन् = ४ कस्मिन् सति त्वयि ऽविद्यमाने सति = ४ कस्मिन् केन मनो नसति = २ हरेण पुंस्कोकिलाः शब्दसूचितः = ५ गुणापितः = २

कथंभूतं त्वशेषं = ४

हरितारुणचारुबन्धः यस्य सः = २

कथं कलिपङ्क्तिः = २

मो काम करुणदीनं स्वरो येषु = ९

१३

सुरतस्य दूतिः सुरत दूतिः पदेषु स्थानेषु =१

कथंभूतानि सुरतानि =१

स्थितः रतिदूतिपदेषु कोकिलं मधुरालापनिसर्गपंडितं १६ शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथू
नि च सुरतानि च तानि ते रहः स्मर संस्मृत्य न शांतिरस्ति मे १७ रचितं रतिपंडित त्वया स्वयमंगेषु ममेदमा
र्तवं ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते १८ विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृ
तः तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे १९ मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति
मे वचनीयमिदं व्यवस्थितं रमण त्वामनुयामि यद्यपि २० अहमेत्य पतंगवर्त्मना पुनरंकाश्रयिणी भवा
मि ते चतुरैः सुरकामिनीजनैः प्रिय यावन्न विलोभ्यसे दिवि २१ क्रियतां कथमंत्यमंडनं परलोकांतरि
तस्य ते मया सममेव गतोस्यतर्कितां गतिमंगेन च जीवितेन च २१ क्व नु ते हृदयंगमः सखा कुसुमायोजित
कार्मुको मधुः न रवैरुरुकोपपिनाकिना गमितः सोपि सुहृद्गतां गतिं २२ अथ तैः परिदेवनाक्षरैः हृदये
दिग्धशरैरिवार्दितः रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः २३ तमवेक्ष्य रुरोद सा भृशं स्तनसं
बाधमुरो जघान च स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते २४ इति चैनमुवाच दुःखिता सुहृ
दः पश्य वसंत किं स्थितं तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरं २५ अपि संप्रति देहि दर्शनं स्मर प

संस्कृत्य मे मम शांतिर्नास्ति =२

=न लोभ्यसे कि यते =६

कथंभूते नपिनाकिना ...

अविहितेमज्ञनेसति =३

कथंभूतः मधुः ... विलापवचनैः =४

तव दर्शनेन लंघितः तेन=१ =विसतन्तुगुणः प्रत्यंचा यस्य तत्तस्य=२ पत्री शरः पक्षपुंखयोरित्यमरः=२ हे प्राणनाथ नन्विति निश्चयेन=१

कु० २४

र्युत्सुक एष माधवः दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने २६ अमुना ननु पार्श्ववर्तिना जगदा-

ज्ञासमुरासुरं तव विशतंतुगुणस्य कारितं धनुषः कोमलपुष्पपत्रिणः २७ गत एव न ते निवर्त्तते स सखा दी-

प इवानिलाहतः अहमस्य दशेव पश्य मामविषह्यव्यसनप्रधूमिता २८ विधिना कृतमर्द्धवैशसं ननु मां काम-

वधे विमुंचता अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी २९ तदिदं क्रियतामनंतरं भवता बंधुज-

नप्रयोजनं विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरंतिकं ३० शशिना सह याति कौमुदी सह मेघेन तडित्प्र-

लीयते प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ३१ अमुनैव कषायितस्तनी सुभगेन प्रियगात्र-

भस्मना नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ३२ कुसुमास्तरणे सहायतां बहुशः सौम्य

गतस्त्वमावयोः कुरु संप्रति तावदाशु मे प्रणिपातांजलियाचितश्चितां ३३ तदनु ज्वलनं मदर्पितं त्वर-

येर्दक्षिणवातवीजनैः विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना ३४ इति चापि विधाय दीयतां स-

लिलस्यांजलिरेक एव नौ अभिभज्य परत्र यन्मया सहितः पास्यति ते स बांधवः ३५ परलोकविधौ च माध-

व स्मरमुद्दिश्य विलोलपल्लवाः निवपेः सहकारमंजरीः प्रियचूतप्रसवो हि ते सखा ३६ इति देहविमुक्तये स्थि

२४

नां रतिं मा काशभवा सरस्वती । शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकंपयत् ॥३९॥ कुसुमायुधपत्नि

दुर्लभस्तव भर्त्ता न चिराद्भविष्यति । शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि ॥४०॥ अभिला

षमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः । अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत् ॥४१॥

परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः । उपलब्धसुखस्तदा स्मरं वपुषा स्वेन नियोजयिष्यति ॥४

इति चाह स धर्मयाचितः स्मरशापावधिदां सरस्वतीम् । अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः

४२ ॥ तदिदं परिरक्ष शोभने भवितव्यप्रियसंगमं वपुः । रविपीतजला तपात्यये पुनरोघेन हि युज्यते

नदी ॥४२॥ इत्थं रतेः किमपि भूतमदृश्यरूपं मन्दीचकार मरणव्यवसायबुद्धिम् । तत्राथ तां कुसुमायुधबं

धुरेनामाश्वासयत्सुचरितार्थपदैर्वचोभिः ॥४३॥ अथ मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयांचका

र । शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम् ॥४४॥ इति श्रीकुमारसंभवे महाकाव्ये

श्रीकालिदासकृतौ रतिविलापो नाम चतुर्थः सर्गः ॥४॥ तथा समक्षं दहता मनोभवं पिनाकि-

कि तस्मिन् प्रभवे बहुल भविष्यति = २

इतीति किं अत्र ह = ४
कुर्यं सतः रूपः तस्या पार्व
ताव वणी कृतः अभि
मुखीकृतः = ४
भवितव्यो भावी प्रिय
संगमः भर्तुः संगमो य
स्य तत् = ५

किरणानां परिक्षये
न धूसरस्य कालिमा
= २

नं ३

भग्नः मनोरथो यस्याः = १ उक्तमर्थमर्थांतरं द्रढयति ईप्सितः इष्टश्चासावर्थश्च तस्मिन् स्थिरः तेन निश्चयं यस्य मनः तत् = ५

१५

15

नाभग्नमनोरथा सती निनिंद रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता १ इयेष सा कर्तुमवंध्यरूप
तां समाधिमास्थाय तपोभिरात्मनः अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः २ निशम्य
चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसां उवाच मेना परिरभ्य वक्षसा निवारयंती महतो मुनिव्रता
त् ३ मनीषिताः संति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न
पुनः पतत्रिणः ४ इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियंतुमुद्यमात् क ईप्सितार्थस्थिरनिश्चयं म
नः पयश्च निम्नाभिमुखं प्रतीपयेत् ५ कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी अयाचि
तारण्यनिवासमात्मनः फलोदयांताय तपःसमाधये ६ अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा
गुरुणा गरीयसा प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरीशिखरं शिखंडिमत् ७ विमुच्य सा हारम
हार्यनिश्चया विलोलयष्टिप्रविलुप्तचंदनं बबंध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंह
ति ८ यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननं न षट्पदश्रेणिभिरेव पंकजं सशैवलासं

पुनः शिरीषपुष्पं पतत्रिणः पक्षिणः वदन्सहेत = ४

गमपि प्रकाशते ॥९॥ प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार यां । अकारि तत्पूर्वनिबद्ध-
या तया सरागमस्याः रसनागुणास्पदं ॥१०॥ विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् । कुशाङ्कु-
रादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥११॥ महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म
दूयते । अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले ॥१२॥ पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि नि-
क्षेप इवार्पितं द्वयं । लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ॥१३॥ अरण्यबीजाञ्जलिदानला-
लितास्तथा च तस्या हरिणा विशश्वसुः । यथा तदीयैर्नयनैः कुतूहलात्पुरः सखीनाममिमीत लोचने ॥१४॥ अत-
न्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत् । गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपा-
करिष्यति ॥१५॥ कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीं । दिदृक्षवस्तामृषयोऽभ्युपागमन्न ध-
र्मवृद्धेषु वयः समीक्ष्यते ॥१६॥ विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथिः । नवोटजाभ्यन्तरसम्भृ-
तानलं तपोवनं तच्च बभूव पावनं ॥१७॥ यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस्त काङ्क्षितं । तदानपे-

न नु मन्तो ऋषयः तस्याः कुमार्याः पार्श्वे कथमाजग्मुः तत्राह ... विरोधिसत्त्वैः ... उज्झितः ... सर्वमत्सरं ... हिंसा ... इत्यर्थः ॥ ...

क्ष्य स्वशरीरमार्दवं तपो महत्साचरितुं प्रचक्रमे १८ क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत
ध्रुवं वपुः कांचनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च १९ शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता
मध्यगता सुमध्यमा विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत २० तथातितप्तं सवितुर्गभस्ति
भिर्मुखं तदीयं कमलश्रियं दधौ अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया पदं कृतं २१ अयाचि
तोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्त
साधनं २२ निकामतप्ता विविधेन वह्निना नभश्चरेणेन्धनसंभृतेन च तपात्यये वारिभिरुक्षिता नवैर्भुवा सहो
ष्माणममुंचदूर्ध्वगं २३ स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः वलीषु तस्याः स्ख
लिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः २४ शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवा
तवृष्टिषु व्यलोकयन्नुन्मिषितैस्तडिन्मयैर्महातपःसाक्ष्य इव स्थिताः क्षपाः २५ निनाय सात्यन्तहिमोत्करानि
लाः सहस्यरात्रीरुदवासतत्परा परस्पराक्रन्दिनि चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती २६ मुखेन सा
पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना तुषारवृष्टिक्षतपद्मसंपदां सरोजसन्धानमिवाकरोदपां २७ स्वयं

16

स्वयमेव विशीर्ण...

विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः। तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः २८ मृणालिकाकोमलमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशं। तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा २९ सुरास्तदूरीत्पुनरेककन्यया कृते तपः शंभुवशक्रियाक्षमे यथा चिरेण प्रतिपत्स्यदुःखिताः पतिंप्रपन्नोऽस्तु तमीजिरे तदा ३० अथाजिनाषाढधरः प्रगल्भवाक् ज्वलन्निव ब्रह्ममयेन तेजसा विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ३१ तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः ३२ विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणं। उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ३३ अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनं ३४ अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधां चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ३५ अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु य उत्पलाक्षि प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ३६ यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः तथा हि ते शीलमुदारदर्शने तपस्विनामप्युपदे

=विकीर्णैः पतितैः सप्तर्षीणां संबंधिभिः बलिभिः पुष्पोपहारैः प्रवहति तेन प्रकारेण गांगासंबंधिभिः वारिभिः न भवति कथं पुनः कथं सलिलैः दिवः स्वर्गात् च्युतैः पतितैः येन प्रकारेण पुनः कं निर्मलैः हे पार्वति पर्वतः पवित्रीकृतः कं महीधरः =२ अर्थकामौ धर्मार्थकामानां वर्गः त्रिवर्गः त्रिवर्गसारः त्रिवर्गसारः =२

२७

शतांगते ॥३७॥ विकीर्णसप्तर्षिबलिप्रहासिभिस्तथा न गांगैः सलिलैर्दिवश्च्युतैः ॥ यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः ॥३८॥ अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भामिनि । त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते ॥३९॥ प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ॥ यतः सतां सन्नतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते ॥४०॥ अतोऽत्र किंचिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ॥ अयं जनः प्रष्टुमनास्तपोधने न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥४१॥ कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः ॥ अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात्किमतः परं वद ॥४२॥ भवत्यनिष्टादपि नाम दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी ॥ विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च कृशोदरि त्वयि ॥४३॥ अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे ॥ पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये ॥४४॥ किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् ॥ वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ॥४५॥ दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ॥ अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥४६॥ निवेदितं निःश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते ॥

साध्यं भवा तत्केन कर्त्ता प्राप्तिः इत्यभिप्रायः =१ हि युक्तोऽयमर्थः रत्नं पर न अन्विष्यति न वोष्यति तत्र रत्नं अन्येन अपरेण मृग्यते ईप्सते =१ कथं भूतेन निःश्वसितेन सोष्मणा ऊष्मणा सह वर्त्तते इति सोष्मस्तेन बाष्पसहितेन =१

२७

17

कलमानां शालीनां अग्राणि तद्वत् पिंगलाः पीतरक्तवर्णाः ॥

नेदृश्यते प्रार्थयितव्य एषते भविष्यति दुर्लभः [illegible] कथं ४५ अहो स्थिरः कोऽपि तवेप्सितो युवा चिरायक
र्णोत्पलशून्यतां गते उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिंगलाः ४८ मुनिव्रतैस्त्वाम
तिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदां शशांकलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ४
९ अवैमि सौभाग्यमदेन वंचितं तव प्रियं यश्चतुरावलोकिनः करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्र
मात्मीयमरालपक्ष्मणः ५० कियच्चिरं श्राम्यसि गौरि विद्यते ममापि पूर्वाश्रमसंचितं तपः तदर्धभागे
न लभस्व कांक्षितं वरं तमिच्छामि च साधु वेदितुं ५१ इति प्रविश्याभिहिता द्विजन्मना मनोगतं सा न शशा
कं शंसितुं अथो वयस्यां परिपार्श्ववर्तिनीं निवर्तितानञ्जननेत्रमैक्षत ५२ सखी तदीया तमुवाच वर्णिनं
निबोध साधो तव चेत्कुतूहलं यदर्थमंभोजमिवोष्णवारणं कृतं तपःसाधनमेतया वपुः ५३ इयं महेन्द्रप्र
भृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छ
ति ५४ असह्यहुंकारनिवर्तितः पुरा स्मरारिमप्राप्तमुखः शिलीमुखः इमां हृदि व्यायतपातमक्षिणोत्तवि

अधिका श्रीर्येषां ते इति अधि० तान् ॥ अरूपहार्यं रूपेण सौन्दर्येण हार्यो वशीकरणीयो न भवति ॥
असह्येण सोढुमशक्येन हुंकारेण रौद्रेण निवर्तितः निराकृतः ॥

दिवाकरेण सूर्येण निदग्धा श्यामीकृता विभूषणस्थानानि यस्याः ॥ अप्रियः ॥

अराला नि कुटिलानि पक्ष्माणि नेत्ररोमाणि यस्य तस्य कुटिलरोम्णः ॥

निवर्तिते वा ... अञ्जनं ... नेत्रे यस्मिन् ॥ यस्मै फलाय ॥ किमिव अंभोजं केनचित् पुरुषेण अंभोजं कमलं ... वारणं छत्रं क्रियते तद्वत् ॥

तां कामिव दिवा दिने शशांकलेखामिव ॥ चतुरं ... अवलोकते इति चतुरावलोकी ... मनोहरं अवलोकयतः ॥

हे वर्णिन् इन्द्रादीन् ... आप्तुं ॥

१८

शीर्णे मूर्त्तैरपि पुष्पधन्विनः ५५ तदा प्रभृत्युन्मदना पितुर्गृहे ललाटिकाचंदनधूसरालिका नजातुबा

ला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि ५६ उपात्तवर्णे चरिते पिनाकिनः सबाष्पकंठस्खलि

तैः पदैरियं अनेकशः किंनरराजकन्यका वनांतसंगीतसखीररोदयत् ५७ त्रिभागशेषासु निशासु

चा क्षणं निमील्य नेत्रे सहसा व्यबुध्यत क्व नीलकंठ व्रजसीत्यलक्ष्यवागसत्यकंठार्पितबाहुबंधना

५८ यदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं कथं जनं इति स्वहस्तालिखितश्च मुग्धया

रहस्युपालभ्यत चंद्रशेखरः ५९ यदा च तस्याधिगमे जगत्पतेरपश्यदन्यं न विधिं विचिन्वती तदा

सहास्माभिरनुज्ञया गुरोरियं प्रपन्ना तपसे तपोवनं ६० द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपःसा

क्षिषु दृष्टमेष्वपि न च प्ररोहाभिमुखोऽपि दृश्यते मनोरथोऽस्याः शशिमौलिसंश्रयः ६१ न वेद्मि स प्रार्थितदु

र्लभः कदा सखीभिरस्रोत्तरमीक्षितामिमां तपःकृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षतां

६२ अगूढसद्भाव मितीगितज्ञया निवेदितो नैष्ठिकसुंदरस्तया अयीदमेवं परिहास इत्युमामपृच्छद

जितत्वयाब्जलदलाणः ६३ अथाग्रहस्ते मुकुलीकृताङ्गुलौ समर्प्पयन्ती स्फटिकाक्षमालिकां कथंचिदद्रेस्त-
नया मिताक्षरं चिरव्यवस्थापितवागभाषत ६४ यथाश्रुतं वेदविदां वर त्वया जनोयमुच्चैःपदलं-
घनोत्सुकः तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्न विद्यते ६५ अथाह वर्णी विदितो
महेश्वरस्तदर्थिनी त्वं पुनरेव वर्त्तसे अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्स-
हे ६६ अवस्तुनिर्बन्धपरे कथं नु ते करोयमामुक्तविवाहकौतुकः भुजेन शंभोर्वलयीकृताहिना स-
हिष्यते तत्प्रथमावलम्बनं ६७ त्वमेव तावत्परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः वधूदुकूलं
कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि च ६८ चतुष्कपुष्पप्रकरावकीर्णयोः परोपि को नाम
तवानुमन्यते अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु ६९ अयुक्त-
रूपं किमतः परं भवेत्त्रिनेत्रवक्षः सुलभं तवापि यत् स्तनद्वयेस्मिन्हरिचन्दनास्पदे पदं चिताभस्म-
रजः करिष्यति ७० इयं च तेन्या पुरतो विडम्बना यदूढया वारणराजहार्यया विलोक्य वृद्धोक्ष

उक्तं च कुलं च शीलं च सनाथता च विद्या च वित्तं च वपुः वयश्च एतान् गुणान् सप्त समीक्ष्य देया ततः परं भाग्यवशा हि कन्या ॥१८॥ ऊ ली २

क्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति ७१ द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थ-
नया कपालिनः। कला च सा कांतिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ७२ व-
पुर्विरूपाक्षमलक्ष्यजन्मता दिगंबरत्वेन निवेदितं वसु वरेषु यद्बालमृगाक्षि मृग्यते त-
दस्ति किं व्यस्तमपि त्रिलोचने ७३ निवर्त्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पु-
ण्यलक्षणा। अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य हि यूपसत्क्रिया ७४ इति
द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया विकुंचितभ्रूलतयाहिते तया।
विलोचने तिर्यगुपांतलोहिते ७५ उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ मां अलो

कसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम् ७६ विपत्प्रतीकारपरेण मंगलं निषेव्यते

भूतिसमुत्सुकेन वा जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः ७७

अकिंचनः सन्प्रभवः स संपदां त्रिलोकनाथः पितृसद्मगोचरः स भीमरूपः शिव इत्युदीर्यते

न संति याथात्म्यविदः पिनाकिनः ७८ विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालंबि दु

कूलधारि वा कपालि वा स्यादथवेंदुशेखरं न विश्वमूर्तेरवधार्यते वपुः ७९ तदंगसं

सर्गमवाप्य कल्पते ध्रुवं चिताभस्मरजो विशुद्धये तथा हि नृत्याभिनयक्रियाच्युतं

विलिप्यते मौलिभिरंबरौकसां ८० असंपदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो

२०

हषा॥ करोति पादावुपगम्य मौलिना विनिद्रमंदाररजोरुणांगुली॥ ८०॥ विवक्षिता दोषमपि च्युता
त्मना त्वयैकमीशं प्रति साधु भाषितं॥ यमामनंत्यात्मभुवोपि कारणं कथं स लक्ष्यप्रभवो भविष्यति
॥ ८१॥ अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः॥ ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते॥ ८२॥ निवार्यतामालि किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराध
रः॥ न केवलं यो महतोपभाषते शृणोति तस्मादपि यः स पापभाक्॥ ८३॥ इतो गमिष्याम्यथवेति वा
दिनी चचाल बाला स्तनभिन्नवल्कला॥ स्वरूपमास्थाय च तां कृतस्मितः समाललंबे वृष
राजकेतनः॥ ८४॥ तं वीक्ष्य वेपथुमती सरसांगयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहंती॥ मार्गाचल
व्यतिकराकुलितेव सिंधुः शैलाधिराजतनया न ययौ न तस्थौ॥ ८५॥ अद्यप्रभृत्यवनतांगि तवास्मि दा
सः क्रीतस्तपोभिरिति वादिनि चंद्रमौलौ॥ अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशः फले
न हि पुनर्नवतां विधत्ते॥ ८६॥ इति श्रीकुमारसंभवे महाकाव्ये कविश्रीकालिदासकृतौ गौरीतपःफलं नाम पंचमः सर्गः॥
॥ समाप्तः॥ ५ ॥ ६० ॥ अथ विश्वात्मने गौरी संदिदेश मिथः सखीं॥ दाता मे भूभृतां नाथः प्रमाणीक्रिय

तमिति १ तया व्याहृतसंदेशा सा बभौ निभृता प्रिये चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी २ स तथेति

प्रतिज्ञाय विसृज्य कथमप्युमां ऋषीन् ज्योतिर्मयान्सप्त सस्मार स्मरशासनः ३ ते प्रभामण्डलैर्व्योम द्योत

यन्तस्तपोधनाः सारुन्धतीकाः सपदि प्रादुरासन्पुरः प्रभोः ४ आप्लुतास्तीरमन्दारकुसुमोत्करवीचिषु

आकाशगङ्गास्रोतःसु दिग्नागमदगन्धिषु ५ मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः रत्नाक्षसू

त्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ६ अधःप्रस्थापिताश्वेन समावर्जितकेतुना सहस्ररश्मिना शश्व

त्सप्रणाममुदीक्षिताः ७ आसक्तबाहुलतया सार्धमुद्धृतया भुवा महावराहदंष्ट्रायां विश्रान्ताः प्रल

यापदि ८ सर्गशेषप्रणयनाद्विश्वयोनेरनन्तरं पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः ९ प्राक्तना

नां विशुद्धानां परिपाकमुपेयुषां तपसामुपभुञ्जानाः फलान्यपि तपस्विनः १० कुलकं तेषां मध्य

गता साध्वी पत्युः पादार्पितेक्षणा साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती ११ तामगौरवभेदेन मुनींश्चा

पश्यदीश्वरः स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सतां १२ तद्दर्शनादभूच्छम्भोर्भूयान्दारार्थमादरः क्रिया

धर्मीययोग्या धर्म्या तासां क्रियाणां मिज्यादीनां =१   =सांगवेदवक्तारः =२

णां खलु धर्म्याणां सत्पत्न्यो मूलसाधनं १३ धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः १४ अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुं इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः १५ यद्ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतं यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः १६ यस्य चेतसि वर्त्तेथाः स तावत्कृतिनां वरः किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्त्तते १७ सत्यमर्काच्च सोमाच्च परमध्यास्महे पदं अद्य तूच्चैस्तरां तस्मात्स्मरणानुग्रहात्तव १८ त्वत्संभावितमात्मानं बहुमन्यामहे वयं प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः १९ या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसंभवा सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनां २१ साक्षाद्दृष्टोसि न पुनर्विद्मस्त्वां वयमंजसा प्रसीद कथयात्मानं न धियां पथि वर्त्तसे २२ किं येन सृजसि व्यक्तमुत येन बिभर्षि तत् अथ विश्वस्य संहर्ता भागः कतम एष ते २३ अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु चिंतितोपस्थितांस्तावच्छाधि नः करवाम किं २४ अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः उपचिन्वन्प्रभां तन्वीं प्रत्याह परमेश्वरः २५ विदितं वो यथा स्वार्थो न मे काश्चित्प्रवृत्तयः ननु मूर्त्तिभिरष्टाभिरित्थंभूतोस्मि सूचितः २६

तथार्थः युष्माकं विदितः २ यथा सम्यक् ज्ञानं भवति =१   क्षितिजलपवनहुताशनाकाशादिभिः =१

ब्रह्मवेदस्तस्मिन् =३

उच्चैस्थाने =४

हे भगवन् त्वं =५

गुरुतमत्वाद् तिदुर्लभा =३

उत्तरे त्वत्तैः कः चातकः ... त्वं तिं प्रति = २

सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः। अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः॥ २७ ॥ अतः आहर्तुमिच्छामि पार्वतीमात्मजन्मने। उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम्॥ २८ ॥ तामस्मदर्थे युष्माभिर्याचितव्यो हिमाचलः। विक्रियायै न कल्पन्ते संबन्धाः सदनुष्ठिताः॥ २९ ॥ उन्नतेन स्थितिमता धुरमुद्वहता भुवः। तेन योजितसंबन्धं वित्त मामप्यवञ्चितम्॥ ३० ॥ एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते। भवत्प्रणीतमाचारमामनन्ति हि साधवः॥ ३१ ॥ आर्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति। प्रायेणैवंविधे कार्ये पुरन्ध्रीणां प्रगल्भता॥ ३२ ॥ तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम्। महाकोशीप्रपातेऽस्मिन् संगमः पुनरेव नः॥ ३३ ॥ तस्मिन्संयमिनामाद्ये जाते परिणयोत्सुके। जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः॥ ३४ ॥ ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डली। भगवानपि संप्राप्तः प्रथमोद्दिष्टमाश्रमम्॥ ३५ ॥ ते चाकाशमसिश्याममुत्पत्य परमर्षयः। आसेदुरोषधिप्रस्थं मनसा समरंहसः॥ ३६ ॥ अलकामतिवाह्येव वसतिं वसुसंपदाम्। स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम्॥ ३७ ॥ गङ्गास्रोतःपरिक्षिप्तवप्रान्तर्ज्वलितौषधि। बृहन्मणिशिलासालं स्वर्गादपि मनोहरम्॥ ३८ ॥ जितसिं

नसप थी भवति = २

तस्मिन्कार्ये = ५
कार्यनिष्पत्तये = ५

सर विवाहोत्सुके जाते सति = ४

प्रथमं उद्दिष्टः प्रथमोद्दिष्टः तं = २

ओषधिप्रस्थं = २

दशभिः श्लोकैरोषधिप्रस्थं वर्णयति = २

चित्तेन तत्तुल्यं रंहो वेगो येषां ते

महाकोशी नाम काचिन्नदी तस्याः प्रपाते प्रपातस्तु तटो भृगुरित्यमरः

रतिमन् = २

गङ्गाप्रवाहैः परिक्षिप्तं परिवेष्टितं

बृहन्ति पुलोमणिशिलानां शालः प्राकारो यस्य तत्

जितसिंहभयो नागा येषां ते = १

सुरधिष्ण्या = २

इति वः युष्माकं न उपदिश्यते = ४

कोशीस्वरूपं ... = ५

पञ्चवत्सु ... = २

स्वर्गाभिष्यन्दस्य दोषस्य ... मनं निस्सारणं उपनिवेशितं स्थापितं = २

२२

हेमपद्मानां गोः यत्रोष्ट्रा विलयोनेयः यक्षाः किंपुरुषाः पौराः यो वित्तो वनदेवताः ३९ शिखरासक्तमेघा

नो व्यज्यन्ते यत्रैव वेश्मनां मन्द्रगर्जितसंदिग्धाः करपुष्करजस्वनाः ४० यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः

गृहेषु पताकाश्रीरपौरादरनिर्मिता ४१ यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु ज्योतिषां प्रतिबिम्बानि प्रा

प्नुवन्त्युपहारताम् ४२ यत्रौषधिप्रकाशेन नक्तं दर्शितसंचराः अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ४३

यौवनान्तं वयो यस्मिन्नान्तकः कुसुमायुधात् रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः ४४ भ्रूभेदिभिः सकम्पौ

ष्ठैर्ललिताङ्गुलितर्जनैः यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः प्रियाः ४५ संतानकतरुच्छायासुप्तवि

द्याधराध्वगम् यस्य चोपवने बाह्ये गन्धवद्गन्धमादनम् ४६ कुलकम् तत्रागारं धनपतेर्दिव्यं प्रेक्ष्य हेमवर्तं पुरं स्वर्गा

भिसंधिसुकृतं वञ्चनामिव मेनिरे ४७ ते सनिनिर्गिरेर्वेगादुत्सुकस्यन्दनस्थिताः प्रवर्तते स्वं वटाभारैर्लि

खितानलनिश्चलाः ४८ तानेष्वीभ्रमन्द्रमादाय दूरं श्रेत्सुद्यौ गिरिः नमयन्सारगुरुभिः पादन्यासैर्वसुंधराम्

४९ गगनादवतीर्णा सा यथावृद्धपुरस्सरा तोयान्तर्भास्करालीव रेजे मुनिपरंपरा ५० धातुताम्राधरः प्रांशु

अकृत्यैव स्वभावेन शिलोरस्कः शिलावद्वक्षस्थस्य सः =२ पुनः वः युष्माकं दर्शनं अदृष्टकुसुमं फलं प्रतिभाति न दृष्टकुसुमं ... तत्तु =२

देवदारुबृहद्भुजः ॥ प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ५१ विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकैः स

तैरारोहयामास प्रस्थं तं प्रसिद्धकर्मभिः ५२ युग्मं तत्र वेत्रासनासीनान्नीचैरासनपरिग्रहः इत्युवाच मुनीन्वाचं प्राञ्ज

लिः पृथिवीधरः ५३ अपमेघोदयं वर्षमदृष्टकुसुमं फलं अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ५४ मूढं बुद्ध

मिवात्मानं हैमीभूतमिवायसं भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात् ५५ अद्यप्रभृति भूतानामभिगम्योऽस्मि शुद्ध

ये यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते ५६ जङ्गमं प्रेष्यभावेन स्थावरं चरणाङ्कितं विभक्तानुग्रहं मन्ये द्विरू

पमपि मे वपुः ५७ अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ५८

भवत्संभावनोत्थाय परितोषाय मूर्छते अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे ५९ न केवलं दरीसंस्थं

भास्वतां दर्शनेन वः अन्तर्गतमपास्तं मे रजसोऽपि परं तमः ६० कर्तव्यं वो न पश्यामि स्याच्चेत्किं नोपपद्यते

मन्ये मत्पावनायैव प्रस्थानं भवतामिह ६१ तथापि तावत्कस्मिंश्चित्कार्ये मां दातुमर्हथ विनियोगप्रसादा हि किं

कराः प्रभविष्णुषु ६२ एते वयममी दाराः कन्येयं कुलजीवितं ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ६३ इत्यूचि

एतेषां मध्ये येन कार्यं =१

तत्र येन ब्रूत =१ अत्र एतेषां मध्ये =१ अनादरः = वर्तते =१ धनधान्यादिषु =१

दरीमुखविसर्पिणा दरीएवमुखं तेन विसर्पिता तानितेन ॥

२३

वास्तामेवार्घ्यं दरीमुखविसर्पिणा। द्विगुणप्रतिशब्देन व्याजहार हिमाचलः ॥ ६४ ॥ अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु। ऋषयः प्रेरयामासुः प्रत्युवाचेस भूधरं ॥ ६५ ॥ उपपन्नमिदं सर्वमतः परमपि त्वयि। मनसः शिखराणां च सदृशी ते समुन्नतिः ॥ ६६ ॥ गामधास्यत्कथं नागो मृणालमृदुभिः फणैः। आरसातलमूलात्त्वमवालम्बिष्यथा न चेत् ॥ ६७ ॥ स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथाहि ते। चराचराणां जीवानां कुक्षिराधारतां गतः ॥ ६८ ॥ अच्छिन्नामलसंतानाः समुद्रोर्म्यनिवारिताः। पुनन्ति लोकं पुण्यत्वात्कीर्तयः सरितश्च ते ॥ ६९ ॥ यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः। प्रभवेन द्वितीयेन तथैवोच्छिरसा त्वया ॥ ७० ॥ तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः। त्रिविक्रमोद्यतस्यासीत्स तु स्वाभाविकस्तव ॥ ७१ ॥ यज्ञभाजां मध्ये पदमातस्थुषा त्वया। उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकृतं ॥ ७२ ॥ काठिन्यं स्थावरे काये भवता सर्वमर्पितं। इदं तु ते भक्तिनम्रं सतामाराधनं वपुः ॥ ७३ ॥ यदागमनकार्यं नः ... कार्येन वै ... शब्दमीश्वरमित्युच्चैः ... वेतेतं श्रेयसामुपदेशाच्च वयमत्र भागिनः ॥ ७४ ॥ अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरं ... पृथिव्यादिभिरात्मभिः। येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि ॥ ... कल्पितान्योन्यसामर्थ्यैः ... साद्यं च विमर्त्ययः ॥ ७५ ॥ ... योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनं। अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ॥ ७६ ॥ स ते दुहितरं साक्षात्साक्षी ...

=वरं ददातीति वरदः=१ तव कुलेन त्वत्कुलेन त्वत्कुलस्य उद्धृतिः तस्य एतदेवाह=४

विश्वस्य कर्मणः ॥ वृत एतेव वरदः शंभुरस्मत्संक्रामितैः पदैः ७९ कालापलं तमर्थमिव भारत्या सुतया योक्तुमर्हसि अ
शोच्या हि पितुः कन्या सद्भर्त्रे प्रतिपादिता ८० यावंत्येतानि भूतानि स्थावराणि चराणि च मातरं कल्पयंत्वेना
मीशो हि जगतां पिता ८० प्रणम्य शितिकंठाय विबुधास्तदनंतरं चरणौ रंजयंत्वस्याश्चूडामणिमरीचिभिः ८१
उमा वधूर्भवान्दाता याचितार इमे वयं वरः शंभुरलं ह्येष त्वत्कुलोद्भूतये विधिः ८२ अस्तोतुः स्तूयमानस्य वंद्य
स्यानन्यवंदितः सुतासंबंधविधिना भव विश्वगुरोर्गुरुः ८३ एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी लीलाकम
लपत्राणि गणयामास पार्वती ८४ शैलः संपूर्णकामोपि मेनामुखमुदैक्षत प्रायेण गृहिणीनेत्राः कन्यार्थेषु
कुटुंबिनः ८५ मेने मेनापि तत्सर्वं पत्युः कार्यमभीप्सितं भवंत्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः ८६ इदमत्रो
त्तरं न्याय्यमिति बुद्ध्या विचिंत्य सः आददे वचसामंते मंगलालंकृतां सुतां ८७ एहि सर्वात्मने वत्से भिक्षात्वं परि
कल्पिता अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ८८ एतावदुक्त्वा तनयामृषीनाह महीधरः इयं नमति वः स
र्वांस्त्रिलोचनवधूरिति ८९ ईप्सितार्थक्रियोदारं तेभिनंद्य गिरेर्वचः आशीर्भिरेधयामासुः पुरःपाकाभिरंबिकां ९०

ईप्सितार्थक्रियया इष्टार्थकरणेन [illegible] उदारं महत्=१

पुरःपाकः फले [illegible] यासां ताः=१

२४

ताप्रणिमादरे २० अथ स्तं जाम्बनदवतंसकं । अंकमारोपयामास लज्जमानामरुंधती २१ तन्मातरं चाश्रुमुखी दुहि-

तृस्नेहविक्लवां वरस्यानन्यपूर्वस्य विशोकामकरोद्गुणैः २२ वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबंधुना ते त्र्य-

हमूर्ध्वमाख्याय चेलुश्चीरपरिग्रहाः २३ ते हिमालयमामंत्र्य पुनः प्रेक्ष्य च शूलिनं सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः

खमुद्ययुः २४ पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः कमपरमवशं न विप्रकुर्युर्विभुमपि

तं यदमी स्पृशन्ति भावाः ९५ इति श्रीकुमारसंभवे महाकाव्ये श्रीकालिदासकृतौ उमाप्रदानो नाम षष्ठः

सर्गः ॥ ६ ॥ अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायां समेतबंधुर्हिमवान्सुतायाः विवाह-

दीक्षाविधिमन्वतिष्ठत् १ वैवाहिकैः कौतुकसंविधानैर्गृहे गृहे व्यग्रपुरंध्रिवर्गं आसीत्पुरं सानुमतोनुरागा-

दंतःपुरं चैककुलोपमेयं २ संतानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालं भासोज्ज्वलत्कांचन-

तोरणानां स्थानांतरं स्वर्ग इवाबभासे ३ एकैव सत्यामपि पुत्रपंक्तौ चिरस्य दृष्टेव मृतोत्थितेव उपाढपाणिग्रह-

णेति पित्रोरुमा विशेषोच्छ्वसितं बभूव ४ अंकाद्ययावंकमुदीरिताशीः सा मंडनान्मंडनमन्वभुंक्त संबंधिभिन्नो-

गृहीतं वारो यस्मि = तत्र एकं आयतनं स्थानं उमारूपमेकं स्थानं = मैत्रे तृतीये मुहूर्ते = १ विन्यस्तं वैडूर्यशिलातलं मरकतमणिशिलापट्टो यस्मिन् सः तस्मिन् = ऊलीप नेतत = २

...गिरेः कुलस्य स्नेहस्तदेकायतनं जगाम ॥ ५ ॥ मैत्रे मुहूर्ते शशिलांछनेन योगं गतासूत्तरफाल्गुनीषु तस्याः शरीरे प्रतिकर्म चक्रुर्बधुस्त्रियो याः पतिपुत्रवत्यः ॥ ६ ॥ सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्नरागं निर्नाभि कौशेयमुपात्तवाणमभ्यंगनेपथ्यमलंचकार ॥ ७ ॥ बभौ च संपर्कमुपेत्य बाला नवेन दीक्षाविधिसायकेन करेण भानोर्बहुलावशाने संधुक्ष्यमाणेव शशांकलेखा ॥ ८ ॥ तां रोध्रकल्केन हृतांगतैलामाश्यानकालेयकृतांगरागां वासो वसानामभिषेकयोग्यं नार्यश्चतुष्काभिमुखं व्यनैषुः ॥ ९ ॥ विन्यस्तवैडूर्यशिलातलेऽस्मिन्नाविद्धमुक्ताफलभक्तिचित्रे आवर्जिताष्टापदकुंभतोयैः सतूर्यमेनां स्नपयांबभूवुः ॥ १० ॥ सा मंगलस्नानविशुद्धगात्री गृहीतपत्युद्गमनीयवस्त्रा निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे ॥ ११ ॥ तस्मात्प्रदेशाच्च वितानवन्तं युक्तं मणिस्तंभचतुष्टयेन पतिव्रताभिः परिगृह्य निन्ये क्लृप्तासनं कौतुकवेदिमध्यं ॥ १२ ॥ तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलंबंत पुरो निषण्णाः भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने संनिहितेऽपि नार्यः ॥ १३ ॥ धूपोष्मणा त्याजितमार्द्रभावं केशांतमंतःकुसुमं तदीयं पर्याक्षिपत्काचिदुदारबंधं दूर्वावता पांडुमधूकदाम्ना

क्लृप्तं रचितं आसनं यस्मिन् सः तं = ३ कौतुकार्थं वेदिः कौतुकवेदिः मध्यः कौ॰ तं = ५ ... = ४

= कथं भूतं केशांतं = ... पुनः कथं भूतं केशांतं अंतः मध्ये कुसुमं यस्य तं = १ ... = यथा स्यात् तथा = १ दूर्वा विद्यते यस्मिन् तत् तेन = १

ध्या २४ आसक्तभृङ्गागुरुचन्दुरस्योः गोरोचनापत्त्रविभक्तमंगं सा चक्रवाकांकितसैक-

तायास्त्रिस्रोतसः कान्तिमतीत्य तस्थौ २५ लीनद्विरेफं परिभूय पद्मं समेघलेखं शशिन-

श्च बिंबं तदाननश्रीरलकैः प्रसिद्धैः चिच्छेद सादृश्यकथाप्रसंगं २६ कर्णार्पितो रोध्रक-

षायरूक्षे गोरोचनाभेदनितांतगौरे तस्याः कपोले परभागलाभाद्बबंध चक्षूंषि यवप्ररो-

हः २७ लेखाविभक्तश्च विभक्तगात्र्याः किंचिन्मधूच्छिष्टविमृष्टरागः कामप्यभिख्यां

स्फुरितैरपुष्यदासन्नलावण्यफलोऽधरोष्ठः २८ पत्युः शिरश्चंद्रकलामनेन स्पृशेति स-

ख्या परिहासपूर्वं सा रंजयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान २९ तस्याः

सुजातोत्पलपत्त्रकांते प्रसाधिकाभिर्नयने समीक्ष्य न चक्षुषोः कांतिविशेषबुद्ध्या काला-

ञ्जनं मंगलमित्युपात्तं ३० सा संभवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा सरि-

लेखया मधूच्छिष्टया विभक्तः =

आसन्ने शोभमाने लावण्यफले यस्य सः = ४

सुजाते उत्पलपत्त्रे वर्कांतिर्यस्मिन् = २

इतिविचित = १

ज्योतिर्भिः = ५

दिहं गैरिवलीयमानैरामुच्यमानाभरणांशुकासे २१ आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमि-
तायताक्षी हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः २२ अथांगुलीभ्यां हरितालमार्द्रं
मांगल्यमादाय मनःशिलां च कर्णावसक्तामलदन्तपत्रं माता तदीयं मुखमुन्नमय्य २३ उमास्तनोद्भेद-
मनुप्रवृद्धो मनोरथो यः प्रथमं बभूव तमेव मेना दुहितुः कथंचिद्विवाहदीक्षातिलकं चकार २४ बबंध
चास्राकुलदृष्टिरस्याः स्थानान्तरे कल्पितसन्निवेशं धात्र्यंगुलीभिः प्रतिसार्यमाणमूर्णामयं कौतुकह-
स्तसूत्रं २५ क्षीरोदवेलेव सफेनपुंजा पर्याप्तचन्द्रेव शरत्त्रियामा नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमा-
दधाना २६ तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता अकारयत्कारयितव्यदक्षा क्रमेण
पादग्रहणं सतीनां २७ अखंडितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा तया तु तस्यार्धशरीर-
लाभात्पश्चात्कृताः स्निग्धजनाशिषो पि २८ इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा सभ्यैः
सभायां सुहृदास्थितायां तस्थौ वृषांकागमनप्रतीक्षः २९ तावद्वरस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानु-
रूपं प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात्पुरशासनस्य ३० बभूव भस्मैव सितांगरागः कपालमेवामल-

कथंभूतः दुकूलभावः गोरोचनैव गोरोचनैव अंको हेमादिचिह्नं यस्य सः=१ ... तस्मात् ... तज्जो ...
हरितालस्येति तिलकयोग्यद्रव्यस्य विकारो यस्यां सा हरि० तस्याः हरि० तिलकस्य क्रियायाः ति० तस्याः=२

26

शेखरश्रीः उपान्तभागेषु च रोचनाङ्को गजाजिनस्यैव दुकूलभावः ३१ तज्जोरवामण्डलमेव तन श्रीः सोपस्य शे
केवलं मीश्वरेण संपेवेषः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे ३२ शंखान्तरज्योति विलोचनं यदंतर्नि
विष्टामलपिंगतारं सान्निध्यपक्षे हरितालमय्यास्तदेव जातं तिलकक्रियायाः ३३ यथाप्रदेशं भुजगेश्व
राणां करिष्यतामाभरणान्तरत्वं शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणरत्नशोभाः ३४ दिवापि नि
ष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन चंद्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य ३
५ इत्यद्भुतैकप्रभवः प्रभावात् प्रसिद्धनेपथ्यविधेर्विधाता आत्मानमासन्नगणोपनीते खड्गे निषिक्तप्र
तिमं ददर्श ३६ स गोपतिं नंदिभुजावलंबी शार्दूलचर्मान्तरितोरुपृष्ठं तद्भक्तिसंक्षिप्तबृहत्प्रमाणमारु
ह्य कैलाशमिव प्रतस्थे ३७ तं मातरो देवमनुव्रजंत्यः स्ववाहनक्षोभचलावतंसाः मुखैः प्रभामंडलरेणुगौरैः
पद्माकरं चक्रुरिवान्तरिक्षं ३८ तासां च पश्चात्कनकप्रभाणां काली कपालाभरणा चकासे बलाकिनी नी
लपयोदराजिः दूरं पुरः क्षिप्तशतह्रदेव ३९ ततो गणैः शूलभृतः पुरोगैरुदीरितो मंगलतूर्यघोषः विमा
नशृंगाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः ४० उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रं

दूरं पुरः अग्रतः क्षिप्ताः प्रसारिता शतह्रदा विद्युत् यस्याः सा=२ ... कपालस्य आभरणं यस्याः सा=२ पुनः क० ... निर्मितं=२

सैतद्दुकूलाद्विदूरमौलिर्बभौ वहन् गांगमिवप्रवाहं ४१ मूर्तेचगंगायमुनेतदानीसचामरेदेवमसेविषातां समुद्रगारूपविपर्ययेपिसहंसपातेइवलक्ष्यमाणे ४२ तमन्वगछत्प्रथमोविधाताश्रीवत्सलक्ष्मापुरुषश्चसाक्षात् जयेतिवाचामहिमानमस्यसंवर्धयंतौहविषेववह्निं ४३ एकैवमूर्तिर्बिभिदेत्रिधासासामान्यमेषांप्रथमावरत्वं विष्णोर्हरस्तस्यहरिःकदाचिद्वेधास्तयोस्तावपिधातुराद्यौ ४४

तंलोकपालाःपुरुहूतमुख्याःश्रीलक्षणोत्सर्गविनीतवेषाः दृष्टिप्रदानेकृतनंदिसंज्ञास्तद्दर्शिताःप्रांजलयःप्रणेमुः ४५ कंपेनमूर्ध्नःशतपत्रयोनिंवाचाहरिंवृत्रहणंस्मितेन आलोकमात्रेणसुरानशेषान्संभावयामासयथाप्रधानं ४६ तस्मैजयाशीःससृजेपुरस्तात्सप्तर्षिभिस्तान्स्मितपूर्वमाह विवाहयज्ञेविततेत्रयूयमध्वर्यवःपूर्ववृतामयेति ४७ विश्वावसुप्राग्रहरैःप्रवीणैःसंगीयमानत्रिपुरावदानः अध्वानमध्वांतविकारलंघ्यस्ततारताराधिपखंडधारी ४८ खेखेलगामीतमुवाहवाहःसशब्दचामीकरकिंकिणीकः तटाभिघातादिवलग्नपंकेधुन्वन्मुहुःप्रोतघनेविषाणे ४९ सप्रापदप्राप्तपराभियोगंनगेंद्रगुप्तंनगरंमुहूर्तात् पुरोविलग्नैर्हरदृष्टिपातैःसुवर्णसूत्रैरिवकृ

आसन्नभूपृष्ठं=१= उन्मुखैः पौरैर्दृष्टः ... उन्मुखाः तैरुन्मुखैः पौरैः दृष्टः=२

२७

°लक्ष्यमाणे ॥५०॥ तस्योपकण्ठे घननीलकण्ठः कुतूहलादुन्मुखपौरदृष्टः । स्वबाणचिह्नादवतीर्य मार्गादासन्नभूपृष्ठमियाय देवः ॥ ५१ ॥ तमृद्धिमद्बन्धुजनाधिरूढैर्वृन्दैर्गजानां गिरिचक्रवर्ती । प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः ॥ ५२ ॥ वर्गावुभौ देवमहीधराणां द्वारे पुरस्योद्घटितापिधाने । समीयतुर्दूरविसर्पिघोषौ भिन्नैकसेतू पयसामिवौघौ ॥ ५३ ॥ ह्रीमानभूद्भूमिधरो हरेण त्रैलोक्यवन्द्येन कृतप्रणामः । पूर्वं महिम्ना स हि तस्य दूरमावर्जितं नात्मशिरो विवेद ॥ ५४ ॥ स प्रीतियोगाद्विकसन्मुखश्रीर्जामातुरग्रेसरतामुपेत्य । प्रावेशयन्मन्दिरमृद्धमेनमागुल्फकीर्णापणमार्गपुष्पम् ॥ ५५ ॥ तस्मिन्मुहूर्ते पुरसुन्दरीणामीशानसंदर्शनलालसानाम् । प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि ॥ ५६ ॥ आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः । बद्धुं न संभावित एव तावत्करेण रुद्धोऽपि हि केशपाशः ॥ ५७ ॥ प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव । उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥ ५८ ॥ विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा । तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ॥ ५९ ॥ जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् । नाभिप्रविष्टाभरणप्रभेण हस्ते

जालान्तरप्रेषिता दृष्टिर्यया सा=१ = अन्या दृष्टिः ... =२ अञ्जनेन ... वञ्चितं वामनेत्रं यस्याः सा=२ नाभौ प्रविष्टा आभरणानां प्रभा यस्य सः तेन=२

वृन्दैः कैरिव=३

दूरविसर्पि उच्छलत्स्वघोषशब्दो ययोः तौ=४

ईशानस्य हरस्य संदर्शनेन लालसा ईशा० तासां महादेवदर्शने लोलुपानां=५

प्रसाधिकया मंडनकारिकया ऽऽलंबितं=२

अपरा किंकुर्वती अंजनकूचिकां धारयंती=१

उद्घटितं पिधानं यस्य तत् तस्मिन्=३

त्यक्तान्यकार्याणि ... मार्गे ... त्यक्तानि ... कार्याणि ... तानि=५

अलक्तकस्य अंको यस्यां सा तां=२

२७

सहस्रपत्राणि पद्मान्याभरणानि येषां ते सह० =२ इन्दुर्मौलिः किं कुर्वन् दिवापि दिने विपासा। दुःखेन निमितः दुर्नि० तस्मिन् =१ कथंभूता रसना =१ निबिडकुतूहलानां सान्द्रकुतूहले ...
प्रासादशृङ्गाणि पर्वतकूटानि =४
तेन प्रकारेण तथा =५

न तस्थाववलंब्य वासः ६० अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती कस्याश्चिदासीद्रसना तदानीमंगुष्ठमूलार्पितसूत्रशेषा ६१ तासां मुखैरासवगंधगर्भैर्व्याप्तांतराः सान्द्रकुतूहलानां विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ६२ तावत्पताकाकुलमिंदुमौलिरुत्तोरणं राजपथं प्रपेदे प्रासादशृंगाणि दिवापि कुर्वन् ज्योत्स्नाभिषेकद्विगुणद्युतीनि ६३ तमेकदृश्यं नयनैः पिबंत्यो नार्यो न जग्मुर्विषयांतराणि तथा हि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ६४ स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयापि तप्तं या दास्यमप्यस्य लभेत नारी सा स्यात्कृतार्था किमुतांकशय्यां ६५ परस्परेण स्पृहणीयशोभं न चेदिदं द्वंद्वमयोजयिष्यत् अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् ६६ न नूनमारूढरुषा शरीरमनेन दग्धं कुसुमायुधस्य व्रीडादमुं देवमुदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः ६७ अनेन संबंधमवाप्य दिष्ट्या मनोरथप्रार्थितमीश्वरेण मूर्द्धानमालि क्षितिपालनोच्चमुच्चैस्तरं वक्ष्यति शैलराजः ६८ इत्यौषधिप्रस्थविलासिनीनां शृण्वन्कथाः श्रोत्रसुखास्त्रिनेत्रः केयूरचूर्णीकृतलाजमुष्टिं हिमालयस्यालयमाससाद ६९ कुलकं तत्रावतीर्याच्युतदत्तहस्तः शरद...

केयूरैरंगदैः चूर्णीकृता लाजानां मुष्टयो यस्य सः =२

अंगुष्ठमूले अर्पितं सूत्रशेषं यस्याः सा अंगु० =
विलोलानि चंचलानि नेत्राण्येव भ्रमराः येषु तानि =२
ज्योत्स्नायाश्चन्द्रकान्त्याः अभिषेकः ज्योत्स्नाभिषेकः तेन द्विगुणा द्युतिर्येषां तानि ज्यो० =४
कोमलशरीरयापि =६

आरूढा रुट् यस्य सः तेन =३
हे आलि ...

आसवस्य मद्यस्य गंधः सो गर्भे येषां ते
कांतैः ...
तावदादौ पताका ...
उत्तोरणं ...
पुनः या अस्य अंकशय्यां उत्संगशय्यां ...
...
क्षितेः पाले क्षितिपालने ...
श्रोत्रयोः सुखाः श्रोत्र० =२
अच्युतेन विष्णुना दत्तो हस्तो यस्य सः =२

घनाद्विधितिमानिवोदयैः कांतानि सर्वैकमलासनेन कांतांतरालेप्रेंडिपतेर्विवेश ॥ ७० ॥ तमन्वगुः शक्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च गणाश्च नंदिप्रमुखाः समस्ताः प्रशस्तमारंभमिवोत्तमार्थाः ॥ ७१ ॥ तत्रेश्वरो विष्टरभाक्यथावत्सरत्नमर्घ्यं मधुमच्च गव्यं नवे दुकूले च नगोपनीतं प्रत्यग्रहीत्सर्वममंत्रवर्जं ॥ ७२ ॥ दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः वेलासमीपं स्फुटफेनराजिर्नवैरुदन्वानिव चंद्रपादैः ॥ ७३ ॥ तया विवृद्धाननचंद्रकांत्या प्रफुल्लचक्षुःकुमुदः कुमार्याः प्रसन्नचेतःसलिलः शिवोभूत्संसृज्यमानः शरदेव लोकः ॥ ७४ ॥ तयोः समीपत्तिषु कातराणि किंचिद्व्यवस्थापितसंहृतानि ह्रीयंत्रणां मानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ॥ ७५ ॥ तस्याः करं शैलगुरूपनीतं जग्राह ता

अवरोधं रक्षतीति अ० तैः = ४

विवृद्धाः हृद्धिं प्राप्ता नन चंद्रमुखे चंद्रकांतिर्यस्याः तया = २

यथा उदन्वान् समुद्रः नवैः नूतनैः चंद्रकिरणैः वेलासमीपं नीयते वेलायाः समीपं वे० = ९ = नद्रतेः =

तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्त्तिः । उमातनौ गूढतनोः स्मरस्य तच्छङ्किनः पूर्वमिव प्ररोहं ॥ ७६ ॥ रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत् । वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य ॥ ७७ ॥ प्रयुक्तपाणिग्रहणं यदन्यद्वधूवरं पुष्यति कान्तिमग्र्यां । सान्निध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य ॥ ७८ ॥ प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे । मेरोरुपान्तेष्विव वर्त्तमानमन्योन्यसंसक्तमहस्त्रियामं ॥ ७९ ॥ तौ दंपती त्रिः परिणीय वह्निमन्योन्यसंस्पर्शनिमीलिताक्षौ । स कारयामास वधूं पुरोधास्तस्मिन्समिद्धार्चिषि लाजमोक्षं ॥ ८० ॥ सा लाजधूमाञ्जलिमिष्टगन्धं गुरूपदेशाद्वदनं निनाय । कपोलसंसर्पिशिखः स तस्या मुहूर्त्तकर्णोत्पलतां प्रपेदे ॥ ८१ ॥ तदीषदार्द्रारुणगण्डलेखमुच्छ्वासिकालाञ्जनरागमक्ष्णोः । वधूमुखं क्लान्तयवावतंसमाचारधूमग्रहणाद्बभूव ॥ ८२ ॥ वधूं द्विजः प्राह तवैष वत्से वह्निर्विवाहं प्रति पूर्वसाक्षी । शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति ॥ ८३ ॥ आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या । निदाघकालोल्बणतापयेव माहेन्द्रमम्भः प्र-

२९

29

ध्रु॰ ध्रुवस्य नक्षत्रविशेषस्य दर्शनाय=१ प्रियदर्शनं यस्य सः तेन प्रियदर्शनेन=१
प्रयुक्तः पाणिग्रहणस्य उपचारो ययोस्तौ=२

पमेमं धृष्णिया ॥ ८४ ॥ ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन सा दृष्ट इत्याननमुन्नमय्य ह्रीस
न्नकण्ठी कथमप्युवाच ॥ ८५ ॥ इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ प्रणेमतुस्तौ पितरौ प्र
जानां पद्मासनस्थाय पितामहाय ॥ ८६ ॥ वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि वीरप्रसवा भवेति वाचस्प
तिः सन्नपि सोऽष्टमूर्त्तावाशास्यचिन्तास्तिमितो बभूव ॥ ८७ ॥ क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात्कन
कासनस्थौ जायापती लौकिकमेषितव्यमार्द्राक्षतारोपणमन्वभूतां ॥ ८८ ॥ पत्रान्तलग्नैर्जलबिन्दुजालै
राकृष्टमुक्ताफलजालशोभं तयोरुपर्यायतनालदण्डमाधत्त लक्ष्मीः कमलातपत्रं ॥ ८९ ॥ द्विधाप्रयुक्तेन
च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन ॥ ९० ॥ तौ स
न्धिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागं अपश्यतामप्सरसां मुहूर्त्तं प्रयोगमाद्यं ललिताङ्गहारं ॥ ९
१ ॥ देवास्तदन्ते हरमूढभार्यं किरीटबद्धाञ्जलयो निपत्य शापावसाने प्रतिपन्नमूर्त्तेर्ययाचिरे पञ्चश
रस्य सेवां ॥ ९२ ॥ तस्यानुमेने भगवान्विमन्युर्व्यापारमात्मन्यपि सायकानां कालेप्रयुक्ता खलु कालविद्भि

सन्धिषु एकस्मिन् नाटके ... सन्धिषु व्यञ्जितः प्रकटीकृतः वृत्तीनां कौशिक्यादीनां भेदो यस्मिन् द्विधा संस्कृतप्राकृतरूपे
कौशिक्यारभटी चैव सात्वती भारती तथा चतस्रो वृत्तयो ज्ञेया ... एकस्मात् रसात् अपरे रसाः रसान्तराणि तेषु ... प्रयुक्तं द्विधाप्रयुक्तं
प्रतिबद्धः नियमेन प्रवर्त्तितो रागो वसन्तादियस्मिन् स तं=२ विमन्युः गतः क्रोधः=२
मनोज्ञा गतिः विक्षेप ललितः अङ्गहारः अङ्गविक्षेपो तेन=५ यस्मिन् स तं=२

२९